# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यः-२ (SEM-4) | **प्रश्नपत्रम् – ३** | गुणाः - ७० |
| विषयः – वास्तुशास्त्रम् | CC-5.4.11 | समयः - ३ तः ६ |
| दिनाङ्कः – १९/४/२०१६ | सन्दर्भग्रन्थः – मयमतम् | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **अधोलिखितश्लोकयोः एकस्योपरि ससन्दर्भं व्याख्यां कुरुत।** | ०४ |
| | (१) समं त्रिपादमर्धं वा महानासीविनिर्गमम्।<br>तद्व्यासत्रिचतुर्भागहीनं स्कन्धान्ततुङ्गकम्॥<br>(२) क्षुद्राल्पानां तु सालानां भित्तिर्हस्तप्रमाणतः।<br>सार्धहस्तावधिर्यावत् पूर्ववद् वर्धयेत् क्रमात्॥ | |
| **प्रश्नः -२** | **अधोलिखितयोः कस्यचिद् एकस्योपरि निबन्धं लिखतु।** | १२ |
| | (१) द्विभूमिविधानं ग्रन्थाधारेण प्रतिपादयत।<br>(२) गृहप्रवेशविधानं ग्रन्थाधारेण विवेचयत। | |
| **प्रश्नः -३** | **अधोलिखितेषु कयोश्चित् द्वयोः टिप्पणीं लिखतु।** | ०४ |
| | (१) गर्भगृहमानं लिखत।<br>(२) धामपर्यायनामानि लिखत।<br>(३) तोरणादिविधानस्य वर्णनं कुरुत। | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः - ४** | **अधोलिखितश्लोकयोः एकस्योपरि ससन्दर्भं व्याख्यां कुरुत।** | ०४ |
| | (१) व्यासं त्रिवितस्तिः स्यदायामं पञ्चकैर्वितस्तिः स्यात्।<br>अधमं त्रिवितस्तिः स्यान्मध्यं तस्मादङ्गुलाधिक्यम्॥<br>(२) उपर्युपरि पीठानां सन्धिरङ्गावसानके।<br>नालमध्येऽर्धमध्ये च कर्णे सन्धि न सन्ध्ययेत्॥ | |
| **प्रश्नः -५** | **अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु।** | १२ |
| | (१) "पीठलक्षणम्" ग्रन्थाधारेण वर्णयत।<br>(२) "यानाधिकारः" इति अध्यायस्य सारांशः लिखतु। | |
| **प्रश्नः -६** | **अधोलिखितेषु कयोश्चित् द्वयोः टिप्पणीं लिखतु।** | ०४ |
| | (१) वेसरलिङ्गस्य लक्षणं लिखत।<br>(२) आर्षलिङ्गस्य लक्षणं लिखत।<br>(३) प्रतिमापीठानि कतिविधानि भवन्ति ? | |
| | **तृतीयान्वितिः - ३** | |

| | | |
|---|---|---|
| **प्रश्नः -७** | **अधोलिखितश्लोकयोः एकस्योपरि ससन्दर्भं व्याख्यां कुरुत ।** | ०४ |
| | (१) शिलादिपीठं निर्दोषं प्रयोज्यं चेत्तदेव हि ।<br>ग्राह्यं ब्रह्मशिलादि स्याद् द्रव्यं पिण्डं च पूर्ववत् ॥<br>(२) ऋज्वागतास्थितं देवं वरदाभयहस्तकम् ।<br>कृष्णापरशुसंयुक्तं कर्त्तव्यं चन्द्रशेखरम् ॥ | |
| **प्रश्नः -८** | **अधोलिखितयोः कस्यचित् एकस्य उपरि वर्णनं कुरुत ।** | ०८ |
| | (१) भवनजीर्णोद्धारं ग्रन्थाधारे वर्णयत ।<br>(२) महेश्वरस्य प्रतिमालक्षणं ग्रन्थाधारे प्रतिपादयत । | |
| **प्रश्नः -९** | **अधोलिखितेषु केषाञ्चित् त्रयाणाम् उत्तराणि लिखत ।** | ०३ |
| | (१) जीर्णोद्धारः अर्थात् किम् ?<br>(२) ईशानदेवस्य अपरनाम किम् ?<br>(३) षण्मुखः कः ?<br>(४) अनन्तशायी कः ? | |
| | **चतुर्थान्वितिः - ४** | |
| **प्रश्नः -१०** | **अधोलिखितश्लोकयोः एकस्योपरि ससन्दर्भं व्याख्यां कुरुत ।** | ०४ |
| | (१) तामसं कृष्णवर्णं तु प्रलयाम्बुदसन्निभम् ।<br>सात्त्विकोद्विचतुर्बाहु राजसः षड्भुजो भवेत् ॥<br>(२) दौवार्यौ द्वारबाह्यस्थौ भूतौ शूलादिधारिणौ ।<br>रौद्रौ भूतगणैर्युक्तौ पिशाचैश्च समावृतौ ॥ | |
| **प्रश्नः -११** | **अधोलिखितयोः कस्यचित् एकस्योपरि निबन्धं लिखतु ।** | ०८ |
| | (१) लक्ष्मीदेव्याः लक्षणं सविस्तरं वर्णयत ।<br>(२) जङ्गबेरमानानि ग्रन्थाधारेण स्पष्टयत । | |
| **प्रश्नः -१२** | **अधोलिखितेषु केषाञ्चित् त्रयाणामुत्तराणि लिखतु ।** | ०३ |
| | (१) चण्डेश्वरप्रतिमायाः लक्षणं लिखत ।<br>(२) विनायकः कस्य पुत्रः अस्ति ?<br>(३) जिनस्य वर्णः कीदृशः ?<br>(४) दक्षिणामूर्तिः कः ?<br>(५) महिषारूढः कः ? | |

***